# Anubhava Trimshat Shloki

# અનુભવત્રિંશચ્છ્લોકી

## Document Information

Text title : Anubhava Trimshat Shloki

File name : anubhavatriMshachChlokI.itx

Category : misc

Location : doc_z_misc_general

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# અનુભવત્રિંશચ્છ્લોકી

આધાયેન્દ્રિયવહ્નિપઞ્ચકમભિપ્રજ્વાલ્ય રાગેન્ધનૈ-
શ્શબ્દાદીન્વિષયાન્ હવીંષિ મનસા સઙ્કલ્પ્ય કામસ્રુચા ।
યસ્યૈ જુહ્વદપારભોગ પરમાનન્દેન સન્મુચ્યતે
તસ્યૈતે પરસંવિદે ભગવતિ પ્રાણેશ્વરાયૈ નમઃ ॥ ૧॥

ન કર્તવ્યં યેષાં કિમપિ હૃદયે લિમ્પતિ રસં
વિધાનવ્યાસેધવ્યતિગમનજઙ્ઘાલમનસામ્ ।
જયન્ત્યેતે ધન્યાઃ પરમવહિતાશેષકરણાઃ
પરાનન્દાસ્વાદસ્વરસગુણવિજ્ઞાનમધુરાઃ ॥ ૨॥

ઉપાવૃત્તૈરક્ષૈરિદમનિદમામર્શવિકલં
કલાશેષેન્દ્વાભં ગલિતકરણીયેતરમલમ્ ।
અસઙ્કલ્પસ્પન્દાદલસ પરિવાહ પરવિદા-
મનાલમ્બં ચેતઃ પરમપિ પરં ચુમ્બતિ ન વા ॥ ૩॥

વિદ્યાવિદ્યુતિતેવ વિદ્યુદચિરાદાલીનમન્ધં તમ-
સાપિ સ્વોદયનિસ્સહાત્મભરણા દૂરે ચિરસ્થાયિકા ।
નાકાશં ન દિશોઽથવા ન તરણિર્નાપીન્દુવૈશ્વાનરૌ
પારેવાઙ્મનસાસ્પદં તુ પરમવ્યોમૈકમોજાયતે ॥ ૪॥

ગુણતાવર્તત્રિનયનમહાભીષણમુખી
મમત્વાહમ્માનદ્વયકુટિલદંષ્ટ્રાગ્રવિકટા ।
કરાલા કાપ્યેષા કવલયતિ હા કાલરજની
પ્રમત્તો લોકોઽયં ભ્રમતિ વિષયાશાપરવશમ્ ॥ ૫॥

સુખાશીરધ્યસ્તામપિ બત ન પશ્યામિ વિષયૈ -
રનુસ્યૂતોદીતેરવધિમસુખોલ્લોલવિતતેઃ ।
અમીષામક્ષાણામનુપશમશિક્ષાવિધિજુપા-
મભદ્રૈકોદર્કા વિનયમનુમન્યેત ક ઇવ ॥ ૬॥

આરુજ્યવ્યવહારગોચરચરાણ્યક્ષાણ્ય વિક્ષેપતઃ
પ્રત્યાસજ્ય યથોપપાદવિષયેષ્વઙ્ગસ્થિતિં કર્મસુ ।
કાર્યાકાર્યવિચારદુર્ગતિદશા મુત્તીર્ય ચેતોઽચિરા-
દૌદાસીન્યરસાયનસ્ય સુહિતં નિર્વાણમાસીદતિ ॥ ૭॥

સંયમ્યાક્ષાણ્યસુભિરબહિર્ભાવનાગન્ધમન્ત-
સ્સત્વે શાન્તિપ્રણયિનિ સમાસજ્ય નિર્લેશલીનમ્ ।
આત્મૈકાન્તાવસિતમહિમજ્યોતિરાનન્દસાન્દ્રં
દગ્ધૈધાગ્નિપ્રતિમમયતે ચેતનો બ્રહ્મભૂયમ્ ॥ ૮॥

અક્ષાણિ પ્રસરન્તુ નામ વિષયેષ્વક્ષામકામોદ્ધણં
ચેતશ્ચાનુવિધીયતામનુકલં તાનેવ સઙ્કલ્પયત્ ।
ભુઙ્ક્તામર્પિતભોગમેભિરપિ તૈર્યસ્યોપકારઃ પરં
પ્રત્યગ્જ્યોતિરહં તદસ્મિ યદિદં દેદીપ્યતે કેવલમ્ ॥ ૯॥

પ્રત્યાસીદતિ યાવદિન્દ્રિયપદં પ્રાચીન સંસ્કારત-
શ્ચેતશ્ચેતિતુમાચિતાં સુવિવિધામારબ્ધભોગક્રિયામ્ ।
લોહં જામ્બનદાવશેષમિવ ચિદ્વિદ્ધં સબાહ્યાન્તરં
પ્રત્યક્ચિત્યવભાસશેષમખિલં તત્તાવદાલીયતે ॥ ૧૦॥

જક્ષક્રીડન્નતિમનુભવન્વા વધૂભિર્વયસ્યૈ-
રન્તર્જ્યોતિસ્તનુમુપજનં પ્રસ્મરન્નાતકામઃ ।
પ્રત્યગ્જ્યોતિર્ગલિતકરણસ્વક્રિયાકાર્યભેદો
ન વ્યાસેધન્ન વિધિમથવા બુદ્ધ્યતે સિદ્ધયોગી ॥ ૧૧॥

વિરમ વિરમ કાર્યાકાર્યસઙ્કલ્પશિલ્પાદયિ હૃદય દુરાયાસદાયાવસાયાત્ ।
પરિચિનુ પરિશાન્તિં પ્રત્યવેક્ષસ્વ કાલં નિયમિતનિજયત્નં નિત્યમારબ્ધભોગાત્ ॥ ૧૨॥

અનુસ્યૂતં યત્તદ્વ્યતિભિદુરનામાર્થરચને
જગત્યેકાકારં સદિદમિતિ સદ્ભાવવિદિતમ્ ।
પરં ધામાસ્મીતિ પ્રતિપદયમાનઃ પ્રતિપદં
પદં ભૂમાનન્દં વિપદપદમાસીદતિ પુમાન્ ॥ ૧૩॥

વિમૃશતુ પદમન્તર્વિદ્યયા તત્પદં વા ગુણયતુ ગુણભોગે વૈગુણીમુદ્ધણાં વા ।
સમુપનમતિ સાક્ષાદક્ષનિર્વેશપદ્યાં વિષયવિષકૃશાનૌ વિપ્લવન્તે વિવેકાઃ ॥ ૧૪॥

આરબ્ધભોગફલમાર્છતિ યદ્યવિદ્યા વિદ્યોદયેઽપિ ન પુનર્ભવભાવહેતુઃ ।
નિર્બીજનીરસફલા નિકુચત્પ્રસૂના પર્યાપ્તપલ્લવદશા જરતી લતેવ ॥ ૧૫॥

કરબદરવદ્વિશ્વં પશ્યન્વિનશ્વરમાવિધેરકરણવશચ્ચેતઃ કુર્વન્કુતૂહલકુણ્ઠિતમ્ ।
વિગલિતબહિર્વ્યાપારેણ ધ્રુવેણ સમાધિના નિજસુખપદે નિસ્ત્રૈગુણ્યે સુખં વિહરામ્યહમ્ ॥

યઃ સ્મર્તુર્ન પુનસ્તમેતિ હૃદયં ભોગાવસાનક્ષણે-
ઽપ્યક્ષિસ્પન્દલવાયુરેવ સકલો ભોગક્ષણો યસ્ય ચ ।
આસ્તાં પૂર્વદશા પરા ચ સહજાયાસસ્તદાત્વેઽપિ યઃ
તસ્મૈ કઃ સ્પૃહયાલુરસ્તુ વિષયાનન્દાય મન્દાદૃતે ॥ ૧૭॥

પશ્યામો ભુવનં ભવાર્ણવમહાવર્તેષ્વિદં બમ્ભ્રમ-
દ્વિન્દુશ્ચાસુખવિપ્લવોદધિતરીં વિદ્યાં પરબ્રહ્મણઃ ।
શાન્તિન્નસ્સુકરામુશન્તિ નિગમા વિદ્યા નિદાનં વયં
વાઞ્છામઃ કથમાદિમધ્યનિધનેષ્વાયાસમાત્રં સુખમ્ ॥ ૧૮॥

આયાસૈરધિકૈર્મનસ્તનુગિરામાપ્તવ્યમલ્પં ફલં
શાન્ત્યા કેવલયા પરં સુખમનાયાસેન લબ્ધું ક્ષમમ્ ।
અંહો પશ્યત સન્નિરસ્ય રસનામૃલે સુધાસ્યન્દિકાં
પ્રાપ્તું વાઞ્છતિ ભસ્મમોદકમયઃ પ્રાકારભઙ્ગશ્રમૈઃ ॥ ૧૯॥

નાયં લોકો મમ ભોગ્યઃ પ્રદિષ્ટો ભક્ત્વા ભઙ્ક્ત્વા ભુઞ્જતે યત્ર લોકઃ ।
સોઽસૌ લોકો મમ ભોગ્યઃ પ્રદિષ્ટો યસ્મિન્ લોકા નિહિતા લોકિનશ્ચ ॥ ૨૦॥

જીર્ણશ્શીર્ણાઙ્ગસન્ધિર્ન વિચલતિ રથઃ સારથિઃ સારહીનઃ
સન્ના એવ પ્રતુન્ના અપિ ચ ન હરયો ગોચરેષુ ક્રમન્તે ।
ગાઢાધી રત્યધીરસ્તદપિ ચ વિષયાન્ભોક્તુમાયોક્તુકામો
યસ્તસ્મૈ સૂર્જિતાય પ્રણતિરિયમસૌ મોહવિસ્ફૂર્જિતાય ॥ ૨૧॥

લુલિતોલ્લલિતવિલાસં કલિવોત્કલિકાત્મસમ્બોધમ્ ।
આકલયન્ જગદખિલં શાન્તાહન્તાધિરાચરામિ મહીમ્ ॥ ૨૨॥

સાધુસમીરસધર્મા શુભમશુભં વા સ્પૃશન્નસઙ્ગગતિઃ ।
નિહ્નુતનિખિલવિશેષો વિચરામિ મહીં વિધૂતવિધિમોહઃ ॥ ૨૩॥

ભારાકાન્તા ધરણિરુદધૌ લોલકલ્લોલજાલે
દૃષ્ટાદૃષ્ટં વિલુઠતિ યથા મજ્જનોન્મજ્જનાભ્યામ્ ।
આનન્દાબ્ધૌ જગદપિ તથા તત્વબોધાભિભૂતં

દ્વૈતાદ્વૈતવ્યપગતતનૌ દૃશ્યતે ચિત્સ્વભાવે ॥ ૨૪॥

નિદ્રામુદ્રાશ્લથનસમયે ભાતિ કુમ્ભાદિ યદ્વત્
તદ્વન્માયાવિલસિતમમું લોકમાલોકમાનઃ ।
અન્તશ્શાન્તાખિલવિષયધીરઞ્જિતાનન્દબોધઃ
પ્રાપ્તં પ્રાપ્તં સમમનુભવન્ ગૂઢધર્મશ્ચરામિ ॥ ૨૫॥

ચિત્તે ભિત્તૌ ચિત્રકર્મેવ દૃશ્યં દૃશ્યાદૃશ્યં બોધતઃ કાલભેદાત્ ।
પશ્યન્નાત્મક્રીડનઃ પર્યટામિ પ્રાપ્તં પ્રાપ્તં ભોગમાસેવમાનઃ ॥ ૨૬॥

પરચરિતમનિન્દ્યં પાપકં નાભિનન્દ્યં
પરહિતમનુવર્ણ્યં પારલૌક્યં વિધેયમ્ ।
સુહૃદુપચરણીયં સૂનૃતં ત્વેવ વાચ્યં
વ્રતમિદમુપદિષ્ટં કેન વા સજ્જનાનામ્ ॥ ૨૭॥

સર્વાત્મના વયસિ નિર્ગલિતે નિસર્ગજીર્ણે જરાવલિભિરાવલિતે શરીરે ।
યદ્ભેષજાચરણમસ્ય વિમૂઢબુદ્ધેરુર્વારુકસ્ય પરમાયસપટ્ટબન્ધઃ ॥ ૨૮॥

ઇતરેતરયોગપરદ્વન્દ્વં નેતાહ ભોગિનામતનુઃ ।
પ્રાચોર્જાયાપત્યોઃ કથમેકતયા ન યત્સમાહારઃ ॥ ૨૯॥

અહઙ્કારોત્તીર્ણા વિગતવિષયાશ્લેષકલુષા
દૃશિસ્સત્તામાત્રસ્ફુરણપરિશેષાત્મમહિમા ।
ગિરાં દૂરે તત્વં કિમપિ પરમાત્મેતિ તમસઃ
પરસ્તાદાત્મા મે જગદપગિરન્તી વિજયતે ॥ ૩૦॥

નિર્મર્યાદસુખઞ્ચ ધર્મમમરાશાસ્યઞ્ચ સમ્માનનં
વિષ્વક્કીર્તિમમીબદરવિષયં વીર્યઞ્ચ પારે ગિરામ્ ।
યન્મૂલં સકલં વદન્તિ યતયસ્તદ્બ્રહ્મચર્યવ્રતં
મોહેન શ્લથયન્તિ મૂઢમતયો નિર્વાણનિશ્રેણિકામ્ ॥ ૩૧॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
અનુભવત્રિંશચ્છ્લોકી કૃષ્ણાનન્દેન નિર્મિતા ॥ ૩૨॥

ઇતિ કૃષ્ણાનન્દકૃતિષુ અનુભવ ત્રિંશચ્છ્લોકી સમ્પૂર્ણા ॥

Proofread by Rajesh Thyagarajan

*Anubhava Trimshat Shloki*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*